CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13

Coll. No. 164

Title Yatidharmasangraha

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 1646 Subject: Dharmaśāstra

Title: Yatidharmasaṃgraha

Author: Viśveśvara Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.5" by 4" Extent: 8 foll.

Language: Sanskrit. Script: Devanāgarī.

Remarks: Incomplete. The ms. ends abruptly.

॥श्रीगणेशाय नमः॥ ॥प्रणम्य विष्णुमात्मानं सच्चिदानंदमुक्तिदं ॥ गुरुं सर्वज्ञविश्वेशं सर्वयाध्यनविग्रहं ॥१॥ विश्वेश्वरसरस्वत्या क्रियते
वेदमानतः ॥ यतेः परमहंसस्य धर्माणामेष संग्रहः ॥२॥ तत्र संन्यासाश्रमकालनिर्णयो जाबालश्रुत्याभिहितः ॥ ब्रह्मचर्यं समाप्य गृही
भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेदित्याश्रमसमुच्चयः ॥ तथा व्यवस्थितविकल्पोपि ॥ यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदिति ॥ अथ व
स्थितविकल्पोपि गृहाद्वा वनाद्वेति ॥ आरुण्युपनिषदि च ॥ गृहस्थो ब्रह्मचारी वा वानप्रस्थो वा लौकिकाग्नीनुदराग्नौ समारोपयेदिति ॥ तथा ॥ कु
कौ टीचकं ब्रह्मचारी कुटुंबं विसृजेद्दंडान्मूलोकाग्नीन्विसृजेदिति ॥ कुटीचकबहूदकसंन्यासिनोः पारमहंसविहितं जाबालश्रुत्या ॥ त्रिदंडक
मंडलुशिक्यपात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेदिति ॥ आरुण्युपनिषदि ॥ वेदार्थं यो वि
द्वान्स उपनयनादूर्ध्वं स तानि प्राग्वा त्यजेत् पितरं पुत्रमग्न्युपवीतं कर्म कलत्रं चान्यदपीति ॥ स्मृतौ ॥ ॥ बुद्ध्वा कर्माणि यत्कामयेत ॥ तदारभेत
यमितेजमावसेदिति ॥ अंगिराः ॥ ॥ वनवासात्परिश्रांतः प्रव्रजेद्विधिपूर्वकं ॥ आद्याविशेषविरक्तो वा ब्रह्मवित्संन्यसेद्द्विजः ॥५॥ संन्यसेद्ब्रह्मच
र्येण संन्यसेच्च गृहादपि ॥ वनाद्वा संन्यसेद्विद्वानातुरो वाथ दुःखितः ॥ आतुराणां विशेषोस्ति न विधिर्नैव च क्रिया ॥ प्रैषमात्रं तु संन्यासस्या
तुराणां विधीयते ॥५॥ यदा मनसि संजातं वैतृष्ण्यं सर्ववस्तुषु ॥ तदा संन्यासमिच्छेत पतितः स्याद्विपर्यये ॥८॥ यमः ॥ ॥ चीर्णवेदव्रतो विद्वान्ब्रा
ह्मणो मोक्षमाश्रयेत् ॥ समः सर्वेषु भूतेषु चरेषु स्थावरेषु च ॥७॥ उत्पन्नज्ञानविज्ञानो वैराग्यं परमं गतः ॥ प्रव्रजेद्ब्रह्मचर्यात्तु यदिच्छेत्परमां
गतिं ॥८॥ जातपुत्रो गृहस्थो वा विदित्वा नान्यजितेंद्रियः ॥ याज्ञवल्क्यः ॥ अधीतवेदो जपकृत्पुत्रवानन्नदोग्निमान् ॥ शक्त्या च यज्ञकृन्मोक्षे म
नः कुर्यात्तु नान्यथा ॥१०॥ मनुः ॥ ॥ कषायं पाचयित्वा तु श्रेणिस्थानेषु च त्रिषु ॥ प्रव्रजेत्तु परं स्थानं पारिव्राज्यमनुत्तमं ॥१०॥ इत्यादि सर्वथा
व्यपर्यालोचनया धृयमर्थो वगम्यते ॥ अध्ययनवियोगनिरस्तु नरकालयस्य पुरुषस्य यस्मात् भवस्याधो वैराग्यं जायते तेनस्य तत एव
संन्यासेधिकार इति ॥ तथा च श्रुतिस्मृती ॥ ॥ यदहरेव विरजेत्तदहरेव प्रव्रजेदिति ॥ कात्यायनः ॥ ॥ ब्रह्मचर्याद्गृहाद्वापि वनाद्वा संन्यसेद्बु
धः ॥ पुत्रेषु भार्यां निक्षिप्य मतपत्नीक एव वा ॥११॥ व्यासः ॥ ॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थोथ वा पुनः ॥ विरक्तः सर्वकामेभ्यः पारिव्राज्य

॥सौरपुराणे॥यदा मनसि वैराग्यं जायते सर्ववस्तुषु॥तदैव सं
न्यसेद्विद्वानन्यथा पतितो भवेत्॥१८॥उ ९

समाश्रयेत्॥१२॥यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्त्तते॥तावन्न्यासोऽग्निहोत्रं च कर्त्तव्यं तु कलौ युगे॥१३॥विष्णुपुराणे॥ ॥कृते दशभि
र्वर्षैस्त्रेतायां हायनेन तत्॥द्वापरे तत्तु मासेन चाहोरात्रेण तत्कलौ॥१४॥तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः॥प्राप्नोति पुरुषस्तेन
कलिः साध्विति भाषितं॥१५॥इति कलावल्पेन कालेन ब्रह्मचर्यजपादेरधिकं फलं वदन् ब्रह्मचर्यादिप्रधानस्य पारिव्राज्यस्य कलाव स्य
नुष्ठेयत्वं सूचयति॥मनुः॥ ॥ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्॥अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥१६॥अधीत्य वि
धिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः॥इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्॥१७॥अस्य दृष्टानुश्रविकविषयेषु आदावेव वैराग्यं न
न्य जायते॥स एतत्सर्वं यथाशास्त्रं कृत्वा संन्यसेन्नान्यथेति श्लोकयोरर्थः॥अन्यथा ब्रह्मचर्यादेव प्रव्रजेदित्यादिप्रत्यक्षवेदवचनविरोधादप्रा
माण्यप्रसंगात्॥व्रजत्यध इति मोक्षादर्वाक् स्वर्गलोकादिषु वर्त्तनं इत्यर्थः॥न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीति भगवद्व
चनात्॥अनाश्रमित्वमपि॥जाबालश्रुत्या संन्यासो विहितः॥ ॥अथ पुनरव्रती वा व्रती वा स्नातको वास्नातको वोत्सन्नाग्निरनग्निको
वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्॥तथा॥यथातुरः स्यान्मनसा वाचा वा संन्यसेत्॥दक्षस्मृतिः॥ ॥यस्मिन्कामाः प्रविशन्ति विषयेभ्योऽ
पसंहृताः॥विषयान्न पुनर्याति स कैवल्याश्रमे वसेत्॥१८॥यस्मिन्क्रोधः शमं याति विकल्पः सम्यगुज्झितः॥आकाशेऽस्थिर्यथा हि प्र...कैव
ल्याश्रमे वसेत्॥१९॥अंगिराः॥ ॥उत्पन्ने संकटे घोरे चौरव्याघ्रादिगोचरे॥भयभीतस्य संन्यासमंगिरा मुनिरब्रवीत्॥२०॥विरक्तः संन्यसेद्वि
द्वाननिष्ठापि द्विजोत्तमः॥अकर्त्तुमप्यशक्तोऽपि जुहोति यजति क्रियां॥२१॥अन्धः पंगुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः॥सर्वेषामेव वैराग्यं सं
न्यासे तु विधीयते॥२२॥यतनेऽचापि विरक्तो यः संन्यासं कर्तुमिच्छति॥पुनर्दारक्रियाभावान्मृतभार्यः परिव्रजेत्॥२३॥पाराशरः॥ ॥पारि
व्राज्ये तु वैराग्यात्कर्त्तव्यं विष्णुरादिभिः॥विधिनानेन कुर्वीत संन्यासमिह बुद्धिमान्॥२४॥दक्षस्मृतिः॥ ॥संसारमेव निःसारं दृष्ट्वा सार
दिदृक्षया॥प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः॥२५॥अत्रिः॥ ॥न तावन्मुच्यते दुःखाज्जन्ममृत्योश्च बंधनात्॥यावन्न धारयेद्विप्रो
वैष्णवं लिंगमादरात्॥२६॥ ॥विष्णुः॥मुखजानामयं धर्मो वैष्णवं लिंगधारणं॥बाहुजातोरुजातानां नायं धर्मो विधीयते॥२७॥ ॥या ॥१॥